**International Journal of Research in Social Sciences**
**Vol. 14 Issue 08, Aug 2024,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# राजत्वप्रयोजकतावच्छेदकधर्मविचार:

**डॉ. इतिश्री महापात्र**
संविदाध्यापिका (धर्मशास्त्रम्) केन्द्रीय संस्कृत विश्वविद्यालयः
एकलव्य-परिसरः,अगरतला,पश्चिमत्रिपुरा

ब्रह्माण्डेऽस्मिन्यत्किञ्चिदपि विद्यते तस्य सर्वोत्तमोपयोगः केन प्रकारेण कर्त्तव्य इति धर्मशास्त्रस्य प्रमुखविचारविषयः । शास्त्रेऽस्मिन् भारतीयानां कर्त्तव्याकर्त्तव्यविषये विचाराः सन्निहिताः सन्ति । धर्मशास्त्रस्यापरं नाम समाजशास्त्रमिति कथनेन नकाऽपि अत्युक्तिर्भवेत् । जन्मतो मरणं यावत् मनुष्यः सर्वेषु क्षेत्रेषु धर्मशास्त्रस्य विचारपरम्पराम् , आचारं , व्यवहारम् , आदेशं , सिद्धान्तञ्च स्वीकरोति । धर्मं विहाय जगत् धर्मशास्त्रं विहाय च मानवाः क्षणमपि स्थातुं नार्हन्ति । स्मृतिषु मनुस्मृतेः प्राथम्यं तथा प्राधान्यञ्चेति प्रायशः सर्वैः धर्मशास्त्रकारैः तत्पूर्ववर्त्तित्वं स्वीक्रियते । सर्वेषु धर्मशास्त्रेषु मनोर्नामोट्टङ्कनात् स्मृतिसाहित्यस्य प्राचीनत्वं प्रतिपादितम् । मनुस्मृतेरनन्तरं याज्ञवल्क्यस्मृतेः महत्वं वैशिष्ट्यञ्च दृश्यते । यद्यपि केषुचिदेव स्थलविशेषेषु उभयोरपि साम्यं केषुचिच्चवैषम्यं परिलक्ष्यते, तथापि विषयव्यवस्थादृष्ट्या याज्ञवल्क्यस्मृतेः महत्वं समधिकमनुभूयते । यतो धर्मशास्त्रस्य सर्वेऽपि विषयाः याज्ञवल्क्येन भागत्रयेण विभक्ताः । यथा- प्रथमो आचारभागः, द्वितीयो व्यवहारभागः, अन्तिमश्च प्रायश्चित्तो भागोश्चेति ।

विज्ञानयोगिना श्रीमता विज्ञानेश्वरेण याज्ञवल्क्यस्मृतेः आचाराध्यायस्य उपद्धातप्रकरणस्य प्रथमश्लोकस्य व्याख्यानावसरे -[१]

**योगिश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।**
**वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥**

"धर्म" पदेन षड्विधस्मार्त्तधर्माणामुल्लेखः कृतः ते च स्मार्तधर्माः यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति ।

1. वर्णधर्मो ब्राह्मणो नित्यं मद्यं वर्जयेदित्यादि ।
2. आश्रमधर्मोऽग्नीन्धनभैक्ष्यचर्यादि ।
3. वर्णाश्रमधर्मःपालाशो दण्डो ब्राह्मणस्येत्येवमादिः ।
4. गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादि ।
5. निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननिमितं प्रायश्चित्तम् ।
6. साधारणधर्मोऽहिंसादिः । 'न हिंस्यात्सर्वा भूतानि' इत्याचण्डालं साधारणो धर्मः ।

वर्णाश्चत्वारः । तेषु द्वितीयः वर्णः भवति क्षत्रियः,क्षत्रियधर्ममनुसरता राज्ञा प्रजापालनमवश्यं कर्त्तव्यम् । गुणधर्मस्तु राज्ञधर्मः । राज्ञः धर्मः राजधर्मः। राजधर्मः द्विधा विभक्तः । शासनं , विचारश्च । अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमोधर्मः । तच्च दुष्टनिग्रहमन्तरेण न संभवति । तद्

International Journal of Research in Social Sciences
Vol. 14 Issue 08, Aug 2024,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

व्यवहारदर्शनं राजा अहरहः कर्त्तव्यम् । यथा-[२]"**व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोऽन्वहम्**" इति योगिश्वरेणोक्तमाचाराध्याये राजधर्मप्रकरणे उक्तम् । राजधर्मविषये मनुः नृपस्य वृत्तं प्रतिपादयति । यथोक्तम् –[३]

**राजधर्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।**
**सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ।।**

प्रजापालनेन एव दुष्टदमनं सम्भवति । दुष्टदमनेन च प्रजाः सम्यक्परिपालिताः भवन्ति । प्रजापालनातिरिक्तं देशरक्षणं , राज्यजयं च राजा कुर्यात् । शस्त्रग्रहणमपि राजा कुर्यात् । यथोक्तं याज्ञवल्क्येन क्षत्रियस्य प्रधानं कर्म प्रजानां परिपालनम् । इति
मार्कण्डेयपुराणे –[४]

**दानमध्ययनं यज्ञः क्षत्रियस्थाप्ययं त्रिधा ।**
**धर्मः प्रोक्तः क्षितेः रक्षा शस्त्राजीवोऽस्य जीविका ।।**

बृहस्पतिः -[५]

**तत्प्रजापालनं प्रोक्तं त्रिविधं न्यायवेदिभिः ।**
**परचक्राच्चौरभयाद् बलिनोऽन्यायवर्त्तिनः ।।**
**परानीकस्तेनभयमुपायैः शमयेन्नृपः ।**
**वलवत्परिभूतानां प्रत्यहं न्यायदर्शनैः ।।**

कात्यायनः -[६]

**प्रजानां रक्षणं नित्यं कण्टकानां च शोधनम् ।**
**द्विजानां पूजनं चैव एतदर्थं कृतौ नृपः ।।**

मनुः-[७]

**रक्षन् धर्मेण भूतानि राजा वध्यांश्च घातयन् ।**
**यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ।।**
**यदधीते यद्यजते यद् ददाति यदर्चति ।**
**तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ।। इति ।।**

राजा सदा उद्यमी तथा क्रियाशीलश्च भवेत् । उद्योगशीलः नरः सर्वदा समृद्धिं साधयितुं शक्नोति । सूर्ये उदिते यथा जगतः अशुभमयान्धकारः नश्यति तथा राजधर्मः अधर्मं उत्सृङखलप्रवृत्तिं च नाशयति । यथोक्तं महाभारते पितामहेन –[८]

**उदयन् हि यथा सूर्यो नाशयत्यशुभं तमः ।**
**राजधर्मस्तथाऽलोक्यां नाशयत्यशुभां गतिम् ।।**

स्मृतिवचनेषु सामान्यतः प्रजापालनं , व्यवहारदर्शनं, दानमध्ययनं, याजनं, शस्त्राजीवः, क्षितेःरक्षा, कण्टकानां शोधनमित्यादीनि कर्माणि राज्ञा अनुष्ठेयानि इति ज्ञायते । स्मृतिकाराः वदन्ति यदा क्षत्रियः युद्धे शत्रुद्वारा म्रियते तथापि सः स्वर्गे तिष्ठति । श्रेष्ठधर्मत्वेन च तस्य रणे अभिमुखहननमेव उच्यते [९]

**International Journal of Research in Social Sciences**
**Vol. 14 Issue 08, Aug 2024,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

पराशरेण। [१०]मनुरपि कथयति प्रजारक्षणसमये युद्धक्षेत्रात् पलायनं राजा न कुर्यात् , वरं तत्रैव प्राणत्यागं कुर्यात्। कार्याणां सम्यगनुष्ठानार्थं राजा सततमुद्योगशीलः स्यादिति [११]कौटिल्यस्य मतम्। मृदुवचनेन राजा सदा सर्वाः प्रजाः तोषयेत्। सर्वेषां पीडाकारणं दुःखकारणं च प्रयत्नतः श्रृणुयात्। अतः प्रत्यहं राजा विद्यावृद्धसंयोगं च कुर्यात्। विद्यावृद्धेभ्यः विनयं शिक्षेत। विनयमूलो हि राज्ञः अभ्युन्नतिः। अविनीतः राजा सत्वरमेव नश्यति। प्रजासु राजा न कठोरः, न च मृदुः स्यात्। तीक्ष्णो सति प्रजाः उद्वेजिताः स्युः। मृदुश्च यदि स्यात् तर्हि: प्रजाभिः परिभवं प्राप्नुयात् । अतः राजा महोत्साही , बहुदर्शीः , कृतज्ञः , वृद्धसेवकः, सुखदुखे च अपरिवर्तनीभावापन्नः , उतमवंशजः , सत्यवक्ता , पवित्रः, स्मरणशक्तिशीलः, परदोषादर्शनशीलः धर्मपरायणः, बुद्धिमान् ,वीरः , रहस्यगोपनेचतुरः, तर्कविद्यान्वितः, दण्डनीतौ , वार्ताज्ञाने , वेदज्ञः अर्थात् त्रिषु वेदेषु तथा न्यायशास्त्रे च निपुणः भवेत्।
याज्ञवल्क्यस्मृतौ -[१२]

**महोत्साहः स्थुललक्षः कृतज्ञो वृद्धसेवकः ।**
**विनीतः सत्त्वसंपन्नः कुलीनः सत्यवाक्शुचिः ।।**
**अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरूषस्तथा।**
**धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्।।**
**स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च ।**
**विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः ।।**
**ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु ।**
**स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता।।**

, प्रजाः रक्षितुं च समर्थो न भवेत्। अतः राजा दण्डवशाद् यद्यपि किमपि अकार्यं करोति तद् राजधर्मरूपेण गृह्यते न दोषाय। न्यायप्रदानकाले न्याययुक्तः अर्थप्राप्तिरहितः सन् राजा विचारं कुर्यात्। धर्ममार्गेण मनुमतानुसारं राज्यस्य प्रमुखं प्रतिपादकं भवति राजा। राजधर्मप्रकरणे दण्डव्यवस्था अतीव महत्वपूर्णोऽस्ति। दण्डस्य प्रतीकः राजा एव। दमयति इति दण्डः। परमात्मना इन्द्राद्यष्टलोकपालेभ्यः शाश्वतीः मात्राः निहत्य राजा प्रजारक्षणार्थं सृष्टः। मनुमते निरङ्कुशो नास्ति। विधिनिर्माणे निर्णये वा राज्ञोऽधिकाराः धर्मशास्त्रनियन्त्रिता एव। समाजे सद्व्यवस्थायै धर्मस्य , दुष्टनिग्रहार्थम च दण्डस्यावश्यकता भवति। दण्डः मनुमतानुसारं धर्मस्य पुत्रः। दण्डाभावे विभ्रमे वा जनाः दुष्कर्मसु रताः भवन्ति। वर्णाश्रममर्यादा दण्डाभावे विलयं याति। प्रजापरिपालनदुष्टनिग्रहश्चेति द्वयमेव नृपकर्त्तव्यम्। अतएव दण्डस्य आवश्यकता न राज्ञः कृतेऽस्त्येव। दण्डं विना राजा राजकार्यं परिचालयितुं पक्षपातरहितन्यायप्रदानेन राजा उभयलोके सुनाम अर्जयति। दण्डः सर्वान् रक्षति सर्वेषां सुप्तोत्थितावस्थायां सः जाग्रतः तिष्ठति। राजा यदि अस्याः व्यवस्थायाः परिपालनं न कुरूते तर्हि बहवः दोषाः समुत्पद्यन्ते तद् विषये महाभारते उक्तं –[१३]

**क्षममाणं नृपं नित्यं नीचः परिभवेज्जनः।**
**हस्तियन्ता गजस्येव शिर एवारूरूक्षति।।**

**तस्मानैव मृदुर्नित्यं तीक्ष्णो नैव भवेन्नृपः।**
**वासन्तार्क इव श्रीमान् न शीतो न च धर्मदः ॥**

महाभारतीयराजधर्मप्रकरणानुसारेण राजधर्मे दण्डः ईश्वरस्वरूपोऽस्ति यतः धर्मस्यापरं नाम व्यवहारः। धर्मः प्रजानां रक्षकः हितसाधकश्च। धर्मस्य रक्षणार्थाय दण्डस्य व्यवस्था विहिता विद्यते महाभारते। दण्डस्य स्वरूपं यथोक्तं राजधर्मप्रकरणे -[१४]

**असम्मोहाय मर्त्यानामर्थसंरक्षणाय च।**
**मर्यादा स्थापिता लोके दण्डसंज्ञा विशाम्पते ॥**
**यत्र श्यामो लोहिताक्षो दण्डश्चरति सूद्यतः।**
**प्रजास्तत्र न मुह्यन्ते नेता चेत्साधु पश्यति ॥**
**ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः।**
**दण्डस्यैव भयादेते मनुष्याः वर्त्मनि स्थिताः ॥**

ब्राह्मणोचितं कर्म क्षत्रिय पक्षे न शोभनम्। क्षत्रियस्य नित्यं कर्म प्रजानां परिपालनम्। तेन धर्मेण राजा पारलौकिकीं शान्तिं लभते। महाभारत शान्तिपर्वणि दण्डप्रशंसावसरे अर्जुनः उक्तवान् –[१५]

**दण्डः संरक्षते धर्मं तथैवार्थं जनाधिप।**
**कामं संरक्षते दण्डस्त्रिवर्गो दण्डोच्यते।**
**दण्डेन रक्ष्यते धान्यं धनं दण्डेन रक्ष्यते।**
**एवं विद्वान् उपाधत्स्व भावं पश्यस्व लौकिकम् ॥**

मनुनाऽपि-[१६]

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाऽभिरक्षति।**
**दण्डः सुप्तेषु जागार्ति दण्डं धर्मं विदुर्बुधाः।**

पुनश्च राजा प्रजानां हिताय लोकमङ्गलकरं कार्यं कृत्वा प्रजानां मनसि सन्तोषं जनयति। यथा प्रजाः प्रफुल्लिताः भवेयुः, तादृशं कर्म तादृशं प्रयत्नं च करणीयं राज्ञा। प्रजासन्तोषेन राजा सन्तुष्टो भवेत्। सकलधर्मः राज्ञः निर्देशेन परिचलति। राजानं विना सर्वाः प्रजाः विनष्टाः भवन्ति। परलोकभयाच्च मनुष्याः पापात् निवृत्ताः भवन्ति। पुनः राजा दण्डधारण समये पृथक्भावेन व्यवहारं कुर्यात् यथा –[१७]

**वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम्।**
**दानदण्डाः स्मृताः वैश्याः निर्दण्डः शूद्र उच्यते ॥**

यदि राजाऽनलो भूत्वा दण्डप्रणयनं न कुर्यात् तदा शूले कृत्वा मत्स्यानिव बलवन्तो दुर्बलानपक्ष्यन्। बलिनोऽल्पबलानां हिंसामकरिष्यन् इत्यर्थः। यदि राजा दण्ड नाचरिष्यति तदा यज्ञेषु सर्वथा हविरनर्हः काकः पुरोडाशमखादिष्यन् तथा कुक्कुरः पायसादि हविर्लक्ष्यत्। न कस्यचित् कुत्रचित् स्वाम्यमभविष्यत्, ततो बलिना दत्त ग्रहणाद्, ब्राह्मणादिवर्णानां च मध्ये यदवरं शूद्रादि तदेवोत्तरं प्रधानं प्राऽवर्तिष्यत्। सर्वोऽयं लोको दण्डेनैव नियमितः सन्मार्गेष्वतिष्ठते। स्वभाव विशुद्धो हि मानुषः

International Journal of Research in Social Sciences
Vol. 14 Issue 08, Aug 2024,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

कष्टेन लभ्यते । तथा सर्वमिदं जगद् दण्डस्यैव भयादावश्यकभोजनादिरूपेऽपि भोगे समर्थ भवति । मनुनोक्तम् –[१८]

**देव-दानव-गन्धर्वा रक्षांसि पतगोरगाः ।**
**तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ।।**

अतः स्पष्टं प्रमाणीयते देशपरिचालनाय दण्डस्य आवश्यकता अपरिहार्या इति । मनुना दण्डस्य चातुर्विध्यं प्रतिपादितम् – यथा (१) धिग्दण्डः (२) वाग्दण्डः (३) धनदण्डः (४) वधदण्डश्च ।
[१९]कामन्दकीये त्रयः दण्डभेदाः प्रतिपादिताः ।
यथा – (१) वधः (२) अर्थहरणं (३) परिक्लेशः । यथोक्तं –

**वधोऽर्थहरणं चैव परिक्लेशस्तथैव च ।**
**इति दण्डविभागज्ञैर्दण्डोऽपि त्रिविधः स्मृतः ।।**

कामन्दकीये[२०] दण्डस्यान्यथा भेदोऽपि परिकल्पितः । यथा – प्रकाशदण्डः,अप्रकाशदण्डश्च । यच्च वचनम् –

**प्रकाशश्चाप्रकाश्च पूर्वं द्विविध उच्यते ।**
**प्रकाशदण्डं कुर्वीत लोकद्विष्टे तथा रिपौ ।।**

अग्निपुराणे[२१] दण्डः त्रिधा प्रतिपादितः । यथा- (१) वधः (२) अर्थहरणं (३) परिक्लेशश्च

**वधोऽर्थहरणं चैव परिक्लेशस्त्रिधा दमः ।।**

दण्डभयेन प्रजाः धर्मनिरताः भवन्ति । शुक्रनीतौ[२२] दण्डविषये महती चर्चा दृश्यते । तत्र दण्डस्वरूपं प्रतिपादितं यत् असदाचारान्निवर्त्तनार्थं येनोपायेन जन्तुः संदम्यते स एव दण्डः । तं च दण्डं राजा प्रणयेत् । दण्डभयेन प्रजाः धर्मनिरताः भवन्ति । आधर्षणमसत्यभाषणं च न कुर्वन्ति । क्रूराश्च मार्दवं यान्ति , दुष्टाः दुष्टस्वभावं त्यज्यन्ति । पशवोऽपि वशीभूत्वा भवन्ति । पिशुनाः मुक्तां भजन्ते । आततायिनः भयभीताः भवन्ति । अतः समाजस्य कल्याणाय नृपतिः धर्मरक्षणार्थं सदा दण्डधरः स्यात् । राजा अन्तकरणे स्नेहपरायणः, बहिर्भागे निष्ठुरस्वभावं प्रदर्शयेत् । नीचकर्मकारिणं पापिनं च राजा विविधप्रकारैः दण्डयेत् । अपराधानुसारं मासं,त्रिमासं, षण्मासं,संवत्सरं,तदधिकं कालं वा कारागारे निक्षिपेत् । दण्ड-प्रशंसा मस्यपुराणे[२३] विवृता यथा-

यदा विजिगीषुः सामादिभिः त्रिभिरूपायैः वशीकर्तुं न शक्नुयात् तदा दण्डेन सर्वान् वशीकुर्यात् । यतः दण्डेनैव सर्वे वशीभूताः भवन्ति । तस्यैव दण्डस्य प्रणयनं सम्यग् विचारपूर्वकं राज्ञा कर्त्तव्यम् । स्वदेशे परदेशे वा धर्मज्ञान् वानप्रस्थान् निर्ममान्निष्परिग्रहान् समीक्ष्य दण्डप्रणयनं राजा कुर्यात् । स्वयं धर्म एव दण्डरूपेण सर्वान् पालयति रक्षति च । राजा सर्वान् विषयान् सम्यग् विचार्य यथायथं दण्डं प्रयुञ्जीत तेन च सः प्रजारञ्जकः स्यात् । अतः राजा दण्डप्रणयनं सम्यग् कृत्वा लोकेऽभिनिन्दितश्च स्यात् । यथा मनुनोक्तम् –[२४]

**समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ।**
**असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ।।**

संसारे सर्वेऽपि प्राणिनः स्वातन्त्र्यमिच्छन्ति । यद्यपि तत्वतः स्वतान्त्र्यमिति पदस्यार्थो भवति मनसः इन्द्रियाणां च दमनपूर्वकात्मनः तन्त्रमर्थात् जीवात्मनः स्वरूपज्ञानमिति । किन्तु भौतिकदृष्ट्या स्वमनोऽनुकुलाचरणं निर्वाधरूपेण स्वातन्त्र्यमिति जनाः स्वीकुर्वन्ति । तत्रापि स्वमनोऽनुकूलाचरणमन्येषां कृते समाजस्य कृते च प्रतिकूल्यं जनयतीति हेतोरस्माकं पुरातनसंविधानकारैरर्थात् धर्मशास्त्रकारैः दुष्टनिग्रहाय सामाजिकसमरसतायै च दण्डविधयः परिकल्पितः । भयं विना जनाः उच्छृंखलतां कुर्वन्ति येन समाजे अशान्तिः अराजकता च भवति । अतः दण्डविधानेन भययुक्ताः भूत्वा जनाः समाजानुकुलम् आचरन्ति । धर्मः प्रजानां रक्षकः हितसाधकश्च दण्डस्य त्रिवर्गसिद्धिं साधयता महाभारतकारेण प्रोक्तं यत् धर्मार्थकामाणां संरक्षणात् दण्डः त्रिवर्ग इत्युच्यते ।राजदण्डभयात् पापाः पापं न कुर्वन्ति । परलोकभयाच्च मनुष्याः पापात् निवृत्ताः भवन्ति । इत्थं सांसिद्धिके लोके सर्वं प्रतिष्ठितमस्ति । दण्डनीत्या युगानामपि निर्माणं भवतीति प्रतिपादयित्वा महाभारतं दण्डनीतिः गौरवं पुनः प्रतिष्ठापयति राजधर्मानुशासनोपपर्वणः एकोनसप्तत्यध्याये । भीष्मदेवेन प्रतिपादितं यत् दण्डनीतेःराज्ञां कृते महाभाग्योदयस्य कारणमस्ति तथा च अनया राजा युगानां निर्माणं कर्त्तुं शक्नुयात् । तेनोक्तं यत् यदा राजा दण्डनीत्य चतुर्थमशमुत्सृज्य त्रीनंशाननुवर्तते यदा त्रेतायुगःप्रवर्त्तते । यदा राजा अर्धं त्यक्त्वा नित्यधर्ममनुवर्तते ततस्तु द्वापरं नाम कालः सम्प्रवर्तते । यदा भूमिपः सम्पूर्णरूपेण दण्डनीतिं परित्यजति तदा कलिः प्रवर्तते । कलौ सर्वेषामेव वर्णानां अधर्मे रूचिः जायते । प्रजाः क्लेशपीडिताः भवन्ति । तद्यथा महाभारते –[२५]

**शुद्रा भैक्ष्येण जीवन्ति ब्राह्मणाः परिचर्यया ।**
**योगक्षेमस्य नाशश्च वर्तते वर्णसंकरः ॥**
**ह्रसन्ति च मनुष्याणां श्वरवर्णमनांस्युत ।**
**व्याधयश्च भवन्त्यत्र म्रियन्ते च गतायुषः ॥ ॥**

राजा समेषां समभावो भवेयुः पण्डिताः समदर्शिनः इति न्यायात् । क्रोधलोभादिविवर्जितः शासकः शास्त्रानुमोदितमार्गं समाश्रित्य शासनं कुर्यात् तर्हि जनाः, देवाः सन्तुष्टाःभविष्यन्तीति । समाजे शान्तिस्थापनाय दण्डनीतिपालनस्य महती आवश्यकता विद्यते इति नास्ति विप्रतिपत्तिः । नेतारःशासकाःवा भ्रष्टाचारविमुखाः भवितुं शक्यते । येन माध्यमेन सर्वोपरि समाजस्य देशस्य विश्वस्य कल्याणं भवितुं शक्यते । अतः धर्मशास्त्रोक्त दण्डविधेः सर्वदा उपयोगित्वामस्तीति दिक् ।

## I. सन्दर्भाः –

१. याज्ञ.स्मृ.१/१
२. याज्ञ.स्मृ.१ /३६०
३. मनु .स्मृ. ७ /१
४. रा.नी.प्र. पृ- १५
५. वृहस्पति-रा. प्र.पृ- २३४
६. का.स्मृ-२/२५
७. मनु. ८/३०५ , ३०६
८. महा. भा. शान्ति. ५६.३०
९. परा.स्मृ. ३/३७
१०. मनु. ७ /८८
११. कौ.अ. ६/२.२-६
१२. या.स्मृ.आ. ३०९ -३११/३३४
१३. शान्ति.पर्व. ५६/३९-४०
१४. महा.शा.पर्व.१५/१०.११.१२
१५. महा.शा.पर्व.१५/३.४
१६. मनु.स्मृ. ७/ १८
१७. शा.प.रा.ध.अनु.प. १५/६
१८. मनु.स्मृ.७ /२३
१९. का.नी. १८/९
२०. का.नी. १८/१०
२१. अग्नि.पु. २४१/५१
२२. शु.नी. ४/१/४३-४६
२३. मत्स्य.पु. २२५/१-१०
२४. मनु.स्मृ ७/१९
२५. शान्ति.पर्व.६३-६५

## - सहायकग्रन्थसूची –

याज्ञवल्क्यस्मृतिः(मिताक्षरासहिता) – चौखम्बा संस्कृत प्रतिष्ठान ।
मनुस्मृतिः- चौखम्बा सुरभारती प्रकाशन ,वाराणसी ,२०१० ।
राजनीतिप्रकाशः- (मित्रमिश्रः)–चौखम्बा संस्कृत सिरिज,वाराणसी १९८७।
महाभारतम् – गीताप्रेस,गोरखपुर।
पराशरस्मृतिः- एसियाटिक सोसाइटि आफ वेङ्गल,कलिकता,१९७२
कौटल्यार्थशास्त्रम् – ओडिशा साहित्य एकाडेमी,भुवनेश्वर, ओडिशा।
कामन्दकीयनीतिसारः- आनन्दाश्रममुद्रणालय, पुना।
अग्निपुराणम् – चौखम्बा संस्कृत सिरिज,वाराणसी।
शुक्रनीतिः – चौखम्बा संस्कृत सिरिज, वाराणसी,१९६८
मत्स्यपुराणम् – मेहेरचन्दलछमनदास, दिल्ली – २,१९८४